http://www.rtuonline.com

# सस्कृत (सस्कृतम्)

## द्वितीय प्रश्न पत्र : (वैदिकसाहित्य, गद्य साहित्यम्, अनुवादः व्याकरणम् च)

समयावधि : घण्टात्रयम् पूर्णाङ्का : 100

1. निम्नलिखित मंत्रयोः हिन्दी-भाषायाम् अनुवादः करणीय -

(क) परा हि मे विमन्यवः पतन्ति वस्य इष्टये।
क्यो न वसतीरुप।

अथवा

विष्णोः नु कम् वीर्याणि प्रवोचम्
यः पार्थिवानि विममे रजांसि।
यो अस्कभायदुत्तरम् सधस्थम्
विचक्रमाणस्त्रेधा उरुगाय।।

(ख) यो जात एवं प्रथमो मनस्वान्
देवो देवान् क्रतुना पर्यभूषत्
यस्य शुष्माद्रोदसी अभ्यसेताम्
नृम्णस्य मह्ना स जनास इन्द्रः।।

अथवा

http://www.rtuonline.com

ma9300930012@gmail.com

Whatsapp @ 9300930012
Your old paper & get 10/-
पुराने पेपर्स भेजे और 10 रुपये पायें,
Paytm or Google Pay से

PTO

http://www.rtuonline.com

http://www.rtuonline.com

http://www.rtuonline.com

सं गच्छध्वम् सं वदध्वम्
सं वो मनांसि जानताम्।
देवा भागम् यथा पूर्वे
संजानाना उपासते।।

२. अधोलिखितेषु प्रश्नेषु पञ्च-प्रश्नानाम् संस्कृत-भाषायाम् उत्तराणि देयानि –
(क) वरुण-देवस्य कति पाशाः सन्ति ?
(ख) अग्नि-सूक्तस्य ऋषिः कः सूक्त-संख्या अंशः अस्ति ?
(ग) कस्मै देवाय हविषाविधेम इति कस्य सूक्तस्य अंशः अस्ति ?
(घ) इन्द्रेण कस्य वधः कृतः ?
(ङ) संज्ञान-सूक्ते कस्य वर्णनमस्ति ?
(च) कस्य छाया अमृतं मृत्युः च अस्ति ?
(छ) ऋग्वेदस्य कस्मात् मण्डलात् विष्णु-सूक्तम् उद्धृतम् अस्ति ?

3. अधोलिखितस्य मन्त्रस्य हिन्दी भाषायाम् व्याख्याम् विधेया –
कुर्वन्नेवेह कर्माणि जिजीविषेच्छत् समाः।
एवम् त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।।

अथवा

हिरण्यमयेन पात्रेण सत्यस्यापिहितम् मुखम्।
तत्त्वम् पूषन्नपावृणु सत्यधर्माय दृष्टये।।

4. अधोलिखितयोः द्वयोः गद्यांशयोः हिन्दी-भाषायाम् अनुवादः करणीयः –

(क) गुरुवचनममलमपि सलिलमिव महदुपजनयति श्रवणस्थितं शूलमभव्यस्य, इतरस्य तु करिण इव शंखाभरणमाननशोभा समुदयमधिकतरमुपजनयति। अयमेव चानास्वादितविषयरसस्य ते काल उपदेशस्य। कुसुमशरप्रहारजर्जरिते हि हृदि जलमिव गलत्युपदिष्टम्। अकारणं च भवति दुष्प्रकृतेन्वयः श्रुतं चाविनयस्य।
चन्दनप्रभवा न दहति मिनलः। मि् वा प्रशमहेतुनापि सा प्रचंडतरी भवति बडबानलो वारिणा।

अथवा

एवं विधयापि चानया दुराचारया कथमपि दैववशेन गृहीताः विक्लवा भवन्ति राजानः सर्वाविनयाधिष्ठानतां च गच्छन्ति। तथाहि, अभिषेकसमयेव चैषां मंगलकलशजलैरिव प्रक्षाल्यते दाक्षिण्यम्, अग्निकार्यधूमेनेव मलिनीक्रियते हृदयम्, पुरोहित-कुशाग्रसम्मार्जनीभिरिवापनीयते क्षान्तिः, उष्णीषट्टबन्धेनेव अचच्छाद्यते जरागमनस्मरणम्, आतपत्रमण्डलेनेवापवार्यते परलोकदर्शनम्, चामरपवनैरिवा-पह्रियते सत्यवादिता, वेत्रदण्डैरिवोत्सार्यन्ते गुणाः, जयशब्दकलकलैरिव तिरिस्क्रियत साधुवादाः, ध्वजपट्टपल्लवैरिव परामृश्यते यशः।।

(ख) न परिचयं रक्षति। नाभिजनमीक्षते। न रूपमालोकयते। न कुलक्रममनुवर्तते। न शीलं पश्यति। न वैदग्ध्यं गणयति। न श्रुतमाकर्णयति। न धर्ममनुरुध्यते। न त्यागमाद्रियते। न विशेषज्ञतां विचारयति। नाचारं पालयति। न सत्यमवबुधयते। न लक्षणं प्रामणीकरोति। गन्धर्वनगरलेखेव पश्यतं एवं नश्यति।

अथवा

इदमेव च पुनः पुनरभिधीयसे। विद्वांसमपि, सचेतनमपि अभिजातमपि धीरमपि

http://www.rtuonline.com
http://www.rtuonline.com

http://www.rtuonline.com

प्रयत्नवन्तमपि पुरुषमियं दुर्विनीता खलीकरोति लक्ष्मीरिति। सर्वथा कल्याणैः पित्रा क्रियमाणमनुभवतु भवान् नवयौवराज्याभिषेकमंगलम्, कुलक्रमागतामुद्वह पूर्वपुरुषैरूढां धुरम्, अवनमय द्विषतां शिरांसि, उन्नमय बन्धुवर्गम्, अभिषेकानन्तरं च प्रारब्धदिग्विजयः परिभ्रमन् विजितामपि तव पित्रा सप्तद्वीपभूषणां पुनर्विजयस्व वसुन्धराम्।

5. अधोलिखितानां वाक्यानां हिन्दी भाषायाम् अनुवादः करणीयः -

(क) शुकनासोपदेशः कस्य ग्रन्थस्य अंशः अस्ति ?

(ख) शुकनासः कम् उपदिशति ?

(ग) का परिचयं न अभिरक्षति ?

(घ) शुकनासः कः अस्ति ?

(ङ) चतस्र अनर्थ-परम्परा का अस्ति ?

(च) गुरुपदेशः कीदृशं स्नानम् अस्ति ?

(छ) केषाम् उपदेष्टारः विरलाः भवन्ति ?

6. अधोलिखितानां वाक्यानां हिन्दी-भाषायाम् अनुवादः करणीयः-

(क) न्यायात्पथः प्रविचलन्ति पदम् न धीराः।

(ख) पयः पानम् भुजङ्गनां केवलं विषवर्धनम्।

(ग) जलबिन्दु-निपातेन क्रमशः पूर्यते घटः।

(घ) दिनक्षमामध्यगतेव सन्ध्या।

(ङ) भवितव्यानाम् द्वाराणि भवन्ति सर्वत्र।

(च) छायेव मैत्री खल-सज्जनानाम्।

(छ) आहारे-व्यवहारे च व्यक्तलज्जः सुखी भवेत्।

(ज) व्यवहारेण जायन्ते मित्राणि रिपवस्तथा।

(झ) उद्योगिनं पुरुषसिंहम् उपैति लक्ष्मीः।

(ञ) मणिना भूषितः सर्पः किमसौ न भयङ्करः।

7. अधोलिखितेषु सूत्रेषु त्रयाणां सूत्राणां व्याख्या सोदाहरणं कार्या -

(क) टा-ङसि-ङसामिनात्स्याः। (ख) ओसि च।

(ग) बहुवचने झल्येत् (घ) नामि।

(ङ) याडापः। (च) आङो नाऽस्त्रियाम्।

8. अधोलिखतेषु पदेषु त्रयाणां पदानां सूत्रोल्लेखपूर्वकं सिद्धिं करणीया -

(क) रामान् (ख) हरयः

(ग) रामैः (घ) सर्वस्मै

(ङ) वारिणा (च) रमाम्।

9. अधोलिखितेषु केषाञ्चित् चतुर्णां सूत्राणाम् व्याख्यां करणीया -

(क) कर्तुरीप्सिततमं कर्म।

(ख) नमः-स्वस्ति-स्वाहा-स्वधाऽलं-वषड्योगाच्च।

(ग) ध्रुवमपायेऽपादानम्

(घ) सप्तम्यधिकरणे च।

(ङ) कर्तृकरणयोस्तृतीया।

(च) प्रातिपदिकार्थ-लिङ्ग-परिमाण-वचन-मात्रे प्रथमा।

. . . . . . . .

http://www.rtuonline.com

http://www.rtuonline.com